**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 5th Anuvaka

**नमो भवाय च रुद्राय च**

namo bhavāya ca rudrāya ca

**नमः शर्वाय च पशुपतेये च**

namaḥ śarvāya ca paśupateye ca

**नमो नीलग्रीवाय च शितिकण्ठाय च**

namo nīlagrīvāya ca śitikaṇṭhāya ca

**नमः कपर्दिने च व्युप्तकेशाय च**

namaḥ kapardine ca vyuptakeśāya ca

**नमः सहस्राक्षाय च शतधन्वने च**

namaḥ sahasrākṣāya ca śatadhanvane ca

**नमो गिरिशाय च शिपिविष्टाय च**

namo giriśāya ca śipiviṣṭāya ca

**नमो मीढुष्टमाय चेषुमते च**

namo mīḍhuṣṭamāya ceṣumate ca

नमो ह्रस्वाय च वामनाय च

namo hra̱svāya ca vāma̱nāya ca̱

नमो बृहते च वर्षीयसे च

namo bṛha̱te ca̱ varṣī̱yase ca̱

नमो वृद्धाय च संवृध्वने च

namo vṛ̱ddhāya ca saṁ̱vṛdhvane ca̱

नमो अग्रियाय च प्रथमाय च

namo̱ agriyāya ca pratha̱māya ca̱

नम आशवे चाजिराय च

nama ā̱śave cāji̱rāya ca̱

नमः शीघ्रियाय च  शीभ्याय च

nama̱ḥ śīghriyāya ca̱  śībhyāya ca̱

नम ऊर्म्याय चावस्वन्याय च

nama ū̱rmyāya cāvasva̱nyāya ca̱

नमः स्रोतस्याय च द्वीप्याय च ॥५॥

namaḥ sroota̱syāya ca̱ dvīpyāya ca .||5||